जे. एस्. पी. एम्.
ब्लॉसम पब्लिक विद्यालयः

| | | |
|---|---|---|
| कक्षा – अष्टमी | वार्षिक परीक्षा | समय – **3** होरा |
| तिथि –**01/03/2024** | विषय - संस्कृत | अङ्काः - **80** |

खण्ड क – अपठितावबोधनम् **(10** अङ्काः**)**

प्र. **1** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

वानराः सेतुनिर्माणम् अकुर्वन्। यदा सेतुबन्धः अभवत् तदा रामस्य तस्य भ्रातुः च नेतृत्वे सर्वेषाम् वानराणाम् समस्त सेना लङ्कां प्राविशत्। लङ्कायाः अधिपतिः राक्षसः रावणः निजपुत्रैः बन्धुभिः च सह युद्धाय तत्परः अभवत्। तदा बहुमासं यावत् भयङ्करं युद्धम् अभवत्। अन्ते सः राक्षसराजः रावणः पराजितः। यदा सः मृतः तदा तस्य स्वर्णनिर्मिता अखिला राजधानी वशम् अधिगता। किन्तु रामः रावणस्य अनुजाय विभीषणाय लङ्कायाः राज्यम् अयच्छत्। तदनन्तरं रामः अयोध्यां प्रति आगच्छत्। तत्र रामस्य राजतिलकः अभवत्। रामस्य राज्ये सकलाः अपि प्रजाः सुरक्षिताः प्रसन्नाः च आसन्। अतः रामस्य राज्यं प्रसिध्दम् अस्ति।

**1)** एकपदेन उत्तरत । **(2)**

1) सेतुनिर्माणं के अकुर्वन् ?

2) वानराणां सेना कुत्र प्राविशत् ?

**2)** पूर्णवाक्येन उत्तरत । **(4)**

1) यदा रावणः मृतः अभवत् तदा किम् अभवत् ?

2) लङ्कायाः अधिपतिः रावणः कैः सह युद्धाय तत्परः अभवत् ?

**3)** अस्याः कथायाः उचितं शीर्षकं लिखत । **(1)**

**4)** यथानिर्देशम् उत्तरत । **(3)**

1) ‘बहुमासं भयङ्करं युद्धम् अभवत् ।’ अस्मिन् वाक्ये ' युद्धम् ' पदस्य विशेषण पदं किम् अस्ति ?
   1) बहुमासम्  ख) युद्धम्  ग) भयङ्करम्

2) 'पराजयः ' इति अर्थे गद्यांशे किं पदं प्रयुक्तम् ?
   1) मृतः  ख) पराजितः  ग) अन्ते

3) 'रामस्य राज्यं प्रसिध्दम् अस्ति' ? अत्र 'प्रसिध्दम्' पदस्य विशेष्यपदं किम् ?
   1) राज्यम्  ख) अतः  ग) रामस्य

खण्ड ख – रचनात्मक कार्यम् **(15** अङ्काः**)**

प्र. **2)** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत। **(5)**



मञ्जूषा – ( पुष्पाणि, वर्षाकाले, शुद्धः, वृक्षाः, सिञ्चतः, पादपान्, जलपात्रेण, बालिका, कुर्वन्ति, वृक्षारोपणम्, बालकाः, चित्रम्, वनमहोत्सवस्य )

**प्र. 3)** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। **(5)**

1) तालाब में सुंदर कमल के फुल हैं।(There are beautiful lotus flowers in the lake.)
2) कल मैं बगिचे में गया था। (Yesterday I went to the garden.)
3) सानिया आदित्य के साथ खेल रही है। (Sania is playing with Aditya.)
4) माता-पिता को नमस्कार करना चाहिए। (One should bow down to parents.)
5) मैं कल गाँव जाऊँगा। (Tomorrow I will go to village.)

**प्र. 4)** मित्रं प्रति लिखितं पत्रं मञ्जूषायाः पदैः पूरयित्वा पुनः लिखत। **(5)**

( i ) ..................
दिनाङ्कः 01/03/2024
प्रिय मित्र महेश,
( ii ) ................ नमस्ते।

ह्यः अहं मित्रैः सह (iii) ............ द्रष्टुं काननवनम् अगच्छम्। तत्र वयम् अनेकान् पशून् अपश्याम। सर्वे पशवः (iv) ........ भ्रमन्ति स्म। सिंहाः उच्चैः अगर्जन्। मयूराः नृत्ये ( v ) .......... आसन्। वस्तुतः मयूरं विना (vi) ......... जन्तुशालाः भव्यशोभाः? तत्र आम्रवृक्षाः अपि आसन्। वस्तुतः यत्र आम्रवृक्षाः तत्र कोकिला तु (vii) ........... एव। अग्रे पुनः (viii) ...............। सर्वेभ्यः मम (ix)............ निवेदनीयः।

तव ( x ) ............,
दिनेशः

मञ्जूषा –( इतस्ततः, भविष्यति, मग्नाः, चेन्नईतः, कुत्र, जन्तुशालां, सस्नेहं, अभिन्नमित्रम्, नमस्कारः,लेखिष्यामि )

## खण्ड ग – अनुप्रयुक्त व्याकरणम् (25 अङ्काः)

**प्र.5)** उचितशब्दरुपाणि रिक्तस्थानानि पूरयत। **(4)**

1) ............. वने तपश्चर्यां कुर्वन्ति। ( साधवः /साधूनाम् /साधून् )
2) इदं ............... सिंहासनम् अस्ति। (रामेण / रामस्य/रामे )
3) ............... भारतस्वर्णभूमिः राजते। (क्षिति /क्षितिम् /क्षितौ )
4) ............... एकां कन्यां पश्यामि। (आवाम् / अहम् /माम् )

**प्र.6)** उचितधातुरूपाणि योजयित्वा रिक्तस्थानानि पूरयत। **(4)**

1) प्रायः सामान्यजनाः काठिन्यम् ...............।
( अनुभवति / अनुभवन्ति / अनुभवतः )

2) वयं ईश्वरं ............... । ( नमति / नमथः / नमामः )
3) वृक्षात् पत्रे ................. । (अपतताम् / अपतत् / अपतः )
4) छात्राः मिलित्वा स्वागतगीतं ................ । (गायन्तु / गायतु /गाय )

**प्र.7)** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत । **(4)**

1) अस्माकं विद्यालये एकः <u>महोत्सवः</u> अभवत्।
2) <u>अद्य+एव</u> मरणमस्तु युगान्तरे वा ।
3) <u>गै+अकः</u> गीतं गायति ।
4) <u>यद्यपि</u> सः कथां पठति तथापि स्मरणं न भवति ।

प्र **8)** उचिताम् उपपदविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत । **(3)**

1) ................ नमः। (भानुना / भानुम् / भानवे)
2) ................ सह पशवः अपि रक्षणीयाः ।
   (पर्यावरणात्/ पर्यावरणाय / पर्यावरणेन )
**3)** ................ सर्वतः कृषिक्षेत्राणि सन्ति । ( ग्रामं / ग्रामेण/ ग्रामस्य )

**प्र.9)** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति प्रत्ययौ संयोज्य लिखत । **(3)**

1) काश्चित् नार्यः जलं <u>पातुं</u> याचन्ते स्म ।
   (1) पा + क्त्वा (ख) पा + तुमुन् (ग) पा + तुम् (घ) पा + ल्यप्
2) सा गीतं <u>श्रु+क्त्वा</u> नृत्यति ।
   (1) श्रुत्वा (ख) श्रुत (ग) श्रुक्त्वा (घ) श्रोतुम्
3) सुरेशः <u>परि+श्रम्+ल्यप्</u> सफलतां प्राप्नोति ।
   (1) परिश्रम् (ख) परिश्रमित्वा (ग) परिश्रम्य (घ) परिश्रल्य

प्र **10)** अधोलिखितानि वाक्यानि संशोध्य पुनः लिखत । **(3)**

1) सैनिकाः विजयी <u>भविष्यति</u> । (भविष्यतः / भविष्यन्ति / भविष्यसि)
2) <u>चत्वारि</u> वेदाः सन्ति । (चतस्रः / चत्वारः / चतुः)
3) <u>वयं</u> विद्यालये गच्छावः । ( आवां / अहं / युवां )

प्र. **11** उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत । **(2)**

1) विद्वान् ............. पूज्यते ।
2) कक्षायां छात्राः ............. वदन्ति ।
   (उच्चैः, कुत्र, सर्वत्र )

प्र **12** उचितैः संख्यावाचिपदैः रिक्तस्थानानि पूरयत। **(2)**

1) उद्याने ............ (3) बालिकाः क्रीडन्ति ।
2) ............ (1) कुक्कुरः क्षेत्रे धावति ।

## खण्ड घ – पठितावबोधनम् (30 अङ्काः)

**प्र.13)** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः । सिद्धोन्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा। तेन उदाहृतं यद् गतिशीलायां नौकायाम् उपविष्टः मानवः नौकां स्थिरामनुभवति, अन्यान् च पदार्थान् गतिशीलान् अवगच्छति।

एवमेव गतिशीलायां पृथिव्याम् अवस्थितः मानवः पृथिवीं स्थिरामनुभवति सूर्यादिग्रहान् च गतिशीलान् वेत्ति ।

**1)** एकपदेन उत्तरत । **(1)**

1) महान् गणितज्ञः ज्योतिर्विच्च कः अस्ति ?

**2)** पूर्णवाक्येन उत्तरत **(2)**

1) कः सुस्थापितः सिद्धान्तः ?

**3)** यथानिर्देशम् उत्तरत । **(2)**

1) `उपविष्ट मानवः` अनयोः पदयोः विशेष्यपदं किम् अस्ति ?

2) `पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति ` अस्मिन् वाक्ये कर्तृपदं किम् अस्ति ?

**प्र.14)** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत

अध्यापिका - इत्थं भगिनीसप्तके इमानि राज्यानि सन्ति-अरुणाचलप्रदेशः, असमः, मणिपुरम्, मिजोरमः, मेघालयः, नगालैण्डः, त्रिपुरा चेति। यद्यपि क्षेत्रापरिमाणैः इमानि लघूनि वर्तन्ते तथापि गुणगौरवदृष्ट्या बृहत्तराणि प्रतीयन्ते।

सर्वे - कथम् ? कथम् ?

अध्यापिका - इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः। न केनापि शासकेन इमाः स्वायत्तीकृताः। अनेक-संस्कृति-विशिष्टायां भारतभूमौ एतासां भगिनीनां संस्कृतिः महत्त्वाधायिनी इति।

क**)** एकपदेन उत्तरत । **(1)**

1) प्राचीनेतिहासे काः स्वाधीनाः आसन् ?

ख**)** पूर्णवाक्येन उत्तरत **।** **(2)**

1) भगिनीसप्तके कानि राज्यानि सन्ति ?

ग**)** यथानिर्देशम् उत्तरत **।** **(2)**

1) 'क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते' अस्मिन् वाक्ये सर्वनामपदं किम् अस्ति?

2) 'भारतभूमौ' एतस्मिन् पदे का विभक्तिः ?

**प्र.15)** अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत **।**

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ।।
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनः पूतं समाचरेत् ।।

क**)** एकपदेन उत्तरत **।** **(1)**

1) कीदृशं जलं पिबेत् ?

ख**)** पूर्णवाक्येन उत्तरत **।** **(2)**

1) अस्मिन् श्लोके सुखदुःखयोः किं लक्षणम् उक्तम् ?

ग**)** यथानिर्देशम् उत्तरत **।** **(2)**

1) ' मनः पूतं समाचरेत् ' अस्मिन् वाक्ये कः लकारः अस्ति?

2) 'वदेत्' अस्मिन् क्रियापदे कः मूलः धातुः अस्ति?

**प्र.16)** प्रश्ननिर्माणं कुरुत **।** **(3)**

1) तयोः नित्यं प्रियं कुर्यात् |
2) सा महाराष्ट्रस्य प्रथमा महिला शिक्षिका आसीत् |
3) अधुना प्लास्टिकनिर्मितानि वस्तूनि प्रायः प्राप्यन्ते |

**प्र.17)** कः कं प्रति कथयति **|** **(2)**

1) यथेष्टं जलं नयत |
2) भवतु | अद्य किं पठनीयम् |

**प्र.18)** अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत **|** **(2)**

1) उपरि (2) नित्यम्

**प्र.19)** समानार्थकपदानि लिखत **|** **(2)**

1) पृथिवी = ………………… (2) योगदानम् = …………………

**प्र.20)** विलोमपदानि लिखत **|** **(2)**

1) वन्दनीया X ………………… (2) अन्धकारः X …………………

**प्र.21)** घटनाक्रमानुसारं लिखत **|** **(4)**

1) उपरितः अवकरं क्षेप्तुम् उद्यतां रोजलिन् बालाः प्रबोधयन्ति|
2) प्लास्टिकस्य विविधापक्षान् विचारयितुं पर्यावरणसंरक्षणेन पशूनेत्यादीन् रक्षितुं बालाः कृतनिश्चयाः भवन्ति |
3) गृहे प्रचण्डोष्मणा पीडितानि मित्राणि एकैकं कृत्वा गृहात् बहिरागच्छन्ति |
4) अन्ते बालाः जलविहारं कृत्वा प्रसीदन्ति |
5) शाकफलानामावरणैः सह प्लास्टिकस्यूतमपि खादन्तीं धेनुं बालकाः कदलीफलानि भोजयन्ति |
6) वृक्षाणां निरन्तरं कर्तनेन, ऊष्मावर्धनेन च दुःखिताः बालाः नदीतीरं गन्तुं प्रवृत्ताः भवन्ति |
7) बालैः सह रोजलिन् अपि मार्गे विकिर्णमवकरं यथास्थानं प्रक्षिपति |
8) मार्गे यत्र-तत्र विकिर्णमवकरं दृष्ट्वा पर्यावरणविषये चिन्तिताः बालाः परस्परं विचारयन्ति |